M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 856

Title: Tiwenilka

856

856

त्रिवेणिका by आशाधर भट्ट

incomplete

Trivenikā		Title
	Āśādhara Bhatta	Author
		Editor
		Year, Vols.
		Publisher
856	Begins abruptly	Remarks

ग्यो हरिर्जयतीति ॥ अत्र नक्तंचरपदसान्निध्यात् हरिशब्दस्य विष्णौ शक्तिर्नियम्यते ॥ एवं हेम
खर्जूरयोर्हन्ते त्यत्र हेमपदसान्निध्येन खर्जूरशब्दस्य रजते शक्तिर्नियम्यते ॥ अत ए
वशक्तिग्राहकबलात् हस्तिनोपि खर्जुरशब्दः क्वचित्प्रयुज्यते इति निरस्तं ॥ आर्हतो यथा ॥
गुरुदेवपरं ब्रह्मेति ॥ अत्र औचित्यात् गुरुशब्दस्य ज्ञानदातरि शक्तिर्नियम्यते ॥ एवं जीवोज
स्मृतिः ॥ जीवकापिस्तद्व योगपतया जीवशब्दस्य वृहस्पतौ शक्तिर्नियम्यते ॥ तस्यैव व्याख्याव
चनत्वात् ॥ सामर्थ्यं यथा ॥ सुरभिः पिकमादकः ॥ अत्र कोकिलमदोत्पादनसामर्थ्येन
सुरभिशब्दस्य वसंते शक्तिर्नियम्यते ॥ एवं राजान्नाम धनद इत्यत्र वितरणसामर्थ्ये
न राजन्शब्दस्य नृपे शक्तिर्नियम्यते ॥ देशो यथा वैकुंठे हरिर्जयति ॥ अत्र वैकुंठरू
पदेशेन हरिशब्दस्य विष्णौ शक्तिर्नियम्यते ॥ एवं शम्याप्रासा अमेध्यक्त भूमिस्पर्शाभ्या
प्रासरूपदेशेन दूरस्थ शब्दस्य वेदव्यासे शक्तिर्नियम्यते ॥ रात्रौ विति पातु वक्ता वि
ति चेष्टा यथा इयं गो मे इति दर्शयति ॥ अत्र हस्तचेष्टया सर्वनामबोधितया गोशब्दस्य

856

धेनौ शक्तिर्नियम्यते ॥ अयमिति पाठे गोशब्दस्य वृषभे शक्तिर्नियम्यते ॥ साहचर्यं यथा
पार्थकृष्णौ रथे स्थितौ ॥ अत्र कृष्णसाहचर्यात्पार्थशब्दस्य [illegible]क्षौ शक्तिर्नियम्यते ॥ ए
वं पार्थसाहचर्यात्कृष्णशब्दस्य च विष्णौ ॥ विरोधिता यथा ॥ रामार्जुनकुलांतकः ॥ अत्र
विरोधितया रामशब्दस्य भार्गवे शक्तिर्नियम्यते ॥ तत एवार्जुनशब्दस्य कार्त्तवीर्ये ॥ संयु
क्तत्वं यथा ॥ जयिनौ हरिराघवौ ॥ अत्र हरिशब्दस्य राघवशब्दसंयुक्तत्वेन सुग्रीवा
ख्यकीशे शक्तिर्नियम्यते ॥ ततश्च राघवशब्दस्य रामे ॥ विप्रयुक्तत्वं यथा ॥ रामः सीतां स्मर
न्नूनं ॥ अत्र रामशब्दस्य सीताविप्रयुक्तत्वेन राघवे शक्तिर्नियम्यते ॥ सीताया अज्ञा
नवशात्स्वरो यथा ॥ सुधाकरस्तु वक्रो द्दष्टिः पंकजवैरिणी ॥ अत्र पदद्वये तत्पुरुष,
स्वरोच्चारेण वक्रो हंसे चक्रवाकेन शक्तिर्नियम्यते ॥ बहुव्रीहिस्वरपाठे तु सुधाकरपं
कजयोः प्राधान्येनेति ॥ वस्तुतः स्वरस्य काव्यमार्गे स्वीकारो न गण्यते ॥ स्वरसंस्कारयोः छंदसि
नियम इति आतिशारदवचनात् ॥ एषामनेकेषां मेलने हानाधिक्यात्फलाधिक्यमिति

न्यायेन सौकर्यातिशयः ॥ किंचैवं त्रिविधानामपि शब्दानां प्रयोगे लोके तत्र रूढिविभिन्ना प्रयोग
रूढिरस्ति ॥ सा च संप्रदायरूढिः कविरूढिर्व्यवहाररूढिश्चेति ॥ तदभावे हि वाचकशब्दप्रयोगो
न भवति ॥ यथा ॥ नदिवा चिरं तिपरः प्रयुज्यते ॥ सर्पोऽहिंतिश्च ॥ अत एव नैषधे ॥ भर्तुः प्रभुर्व्या
धरणस्य दर्पपदप्रयोगा ध्वनिलोक एष ॥ इत्यत्रोरगयहस्याशक्तिरुरगीततोयमेवमर्गोस्यास्तिम
गीति वोक्तः ॥ मत्स्यतंत्रे द्वैतविवेके च ॥ मृगांकत्वेपि न मृगी शशांकत्वात् शशीति तु ॥ चंद्रमाः
कथितस्तत्र रूढेरन्यत्र कारणमिति ॥ २ ॥ अस्या रूढेर्दर्पणं जनेऽप्रसिद्धार्थपदत्वं ॥ निधि
रूपे शक्तिया रुद्रके शक्तिनियामकं च ॥ समर्थभावं न जुतः ॥ यथा यस्यानेशमनिरवर्जुरं स्पृष्ठ
लेविधत्ते त्रसः ॥ किमर्थं हिं न व हनो या चेहमं धनो न्म ह ॥ अत्र रजतवाचक खर्जूरश
ब्दः प्रयोगरूढ्यभावाद्दोषत्वेनाभिमतः ॥ यस्य गेहे हिरण्यं च खर्जुरं च हलाहलं ॥ स कथं
दीनवदनो याचे हम्संधनो न्म हमिति पाठांतरकल्पने हिरण्यपदस्य त्रिविधिः हलाहलं तत्पद
संनिधिवशेन शब्देषयोगाभावेपि तच्छक्ति[illegible] खर्जूरशब्दस्य रजतवाचकत्वबोध

नसमर्थो विद्यतितद्बलेन हो मोद्धारः स्तुकरः ॥ क्वचित्तु पदांतरसंनिधिबलेन शब्दप्रयोगाभा
८ वेपि तच्छक्तिरर्थे बोधयतीति ॥ यथा ॥ हे राम मां पाहि इत्यत्र संबोधनमध्यमपुरुषसंनिधिब
लेन युष्मच्छब्दोध्याहीयते ॥ अत्र युष्मद्युपपदे इत्यादि सूत्रं प्रमाणं ॥ अत एवाह वामनः ॥ वि
शेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ सागरांबरादिवदिति ॥ अस्मादेव ज्ञापकात् द्विविधो
प्यध्याहारः समर्थनः ॥ ॥ इति श्री आशाधरभट्टविरचितायां त्रिवेणिकायां प्रथमं श
क्तिविवेचनाख्यकर्णं समाप्तं ॥ ॥ श्रीगणेशाय नमः ॥ अथ लक्षणा शक्यसंबंधस
हकारिणी वृत्तिर्लक्षणा ॥ सा च व्यापारत्वात्तद्वृत्तिनिष्ठा मुख्यार्थबाधे सति तत्संबंधिनम
र्थं विषयीकरोति ॥ संबंधश्च मुख्यार्थप्राधान्येन वर्त्तमानोपि लक्ष्यार्थमाश्रयति ॥ शक्य
ध संबंधोयं अपि शब्देपि प्रवर्त्तते लक्षणापि लक्षणायाः प्रयोजकः ॥ सा त्रिविधा जहल्लक्षणा ८
अजहल्लक्षणा । जहदजहल्लक्षणा चेति ॥ यस्तत्वे शब्दः शक्यार्थं जहाति सा जहल्लक्षणा ॥
त्रिविधापि पुनर्द्विविधा निरूढा फलवती च ॥ शक्तिवत्कोशादिप्रसिद्धा निरूढा यं च मु

भिन्नविभक्तिकत्वे सति भिन्नार्थनिष्ठत्वं व्यधिकरणत्वं ॥ एकविभक्तिकत्वे सति एकार्थनिष्ठत्वं समा नाधिकरणत्वं
ख्यार्थबाधे प्रवर्त्तत इति शक्तितो विशेषः एषानादिलक्षणेत्युच्यते ॥ फलवती तु व्यंग्यार्थ
प्रतीतये प्रवर्तिता ॥ सा चाधुनिकलक्षणेत्याहुः ॥ अस्याः फलं तु व्यंग्यार्थप्रतीतिः ॥ तत्र क्वचि
द्गूढं क्वचिदगूढं चेति द्विविधं गूढं सहृदयमात्रवेद्यं ॥ अगूढं तु सर्वजनवेद्यं ॥ पुनरपि लक्ष
णा द्विविधा व्यधिकरणविषया समानाधिकरणविषया चेति ॥ यत्र व्यधिकरणपदं ता
त्पर्यग्राहकं सा व्यधिकरणविषया ॥ यत्र च समानाधिकरणपदं तात्पर्यग्राहकं सा समा
नाधिकरणविषया मुख्यार्थबाधकं तात्पर्यग्राहकं तदेव लक्षणाग्राहकमित्युच्यते ॥
पुनरपि गौणी शुद्धा चेत्येवं द्विविधा ॥ सा हि सादृश्यसंबंधे सति गौणी ॥ तद्भिन्नसंबंधे च शुद्धा
असंबंधश्चानेकविध इति संप्रदायः क्रमेणोदाहरणानि ॥ गंगायां घोषः अत्र तीरे व्यधि
करणविषया फलवती जहल्लक्षणा घोषपदं तात्पर्यग्राहकं ॥ शैत्यपावनत्वादिप्रतीतिः फ
लं ॥ केचित्तु तीरं सामीप्यादिकाधारसम्पर्क इत्याहुः ॥ एवं द्वैतवने युधिष्ठिरं समाययावि
त्यत्र सरोविशेषवाचिना द्वैतवनशब्देन तत्तीरे फलजहल्लक्षणा युधिष्ठिरसमागमस्तात्प

र्यश्चारुकः। फलं तु विविक्तताप्रतीतिः। यत्र कैवर्तवनं सर इति भार्यतोक्ते॥ केचित्तत्र कैवर्तवने
निरूढलक्षणेत्याहुः तथोक्तं मारुतेयेन लिंगे न योदेशेख्युक्तः। समभिजल्पते तनेवनाम्ना त
द्देशवाच्यमाहुर्मनीषिण इति निरूढलक्षणायां शक्तितुल्यत्वात् वाच्यमित्युक्तं काव्यप्रदी
पे च यन्नामयत्रचैस्यादिविषयोपि सत्ताद्दशश इति॥ छत्रिणो यांति॥ अत्र छत्रधारिवा
चिना छत्रिशब्देन तत्सहचरस्य छत्रिविषयिप्यधिकरणं वृषयाफलवती अजहल्लक्षणा
बहुत्वं तात्पर्यग्राहकं॥ फलं तु छत्रिबहुत्वप्रतीतिः॥ काकेभ्यो दधिरक्ष्यतां॥ अत्र काकश
ब्देन दध्युपघातकमात्रे फलवती अजहल्लक्षणा॥ फलं तु काकदुष्टताप्रतीतिः॥ राजाग
च्छति॥ अत्र राजशब्देन राजतुरगादिष्वपि फलवती अजहल्लक्षणा फलं तु राजप्रसिद्धि
प्रतीतिः॥ धनुर्भृतः संयति जग्मुः कीर्तिं। अत्र धनुःशब्देन आयुधमात्रे फलवती अजह
ल्लक्षणा॥ एवं ब्राह्मणाय आमादिषि पृच्छस्व॥ अथ फलवती जहल्लक्षणा॥ इयमेव
भागत्यागलक्षणेत्युच्यते॥ पशुर्नन्ति॥ अत्र पशुशब्देन नेत्रे फलवती जहज्जह

ल्लक्षणा॥ फलं तु सकलताप्रतीतिः॥ एवं श्रीसिंहप्रोच्यतीत्यादावपि ज्ञेयं॥ कर्णोत्तंसः
अत्र कर्णाभरणवाचिना अवतंसपदेन भूषणमात्रे फलवती भागत्यागलक्षणा॥ फलं तु त
त्रास्थितत्वप्रतीतिः। हिमांशुवंशकरीरनीलैः। अत्र वंशांकुरवाचिना करीरशब्देन अंकुरमात्र
लक्ष्यते॥ फलं तु चारुत्वप्रतीतिः। हिमांशुवंशस्य करीरमेवं माभिलत्राप्तितथैव करिकलभः।
अत्र हस्तीबालकवाचिना कलभशब्देन बालकमात्रं लक्ष्यते॥ फलं तु धैर्यप्रतीतिः।
अतएव एकार्थपदप्रयोज्यमिद्भुत्वाकरिकलभकर्णावतंसादिषु प्रतिपत्तिविशेष
करेषु न दोष इत्याह॥ वामनः कर्णादिपदे लक्षणा नास्ति। विशिष्टवाचकत्वाभावात्॥
कलभादिपोतत्वस्यादिस्यादिकोज्जेकर्णादिसंबंधाभिधानं प्रयोगरूढिप्रदर्शनार्थं।
मित्याहुः तेन भ्रमरकलभो कर्णयुगलमिति संकरस्याभिप्रयोगे लक्षणा स्यात्॥ व
स्तुतस्तु प्रयोगरूढिर्लौकिकसिद्धेरिति कोशादौ निर्देशो नावश्यकः॥ तेन यथोत्तमे बसा
धु सकीचकैरिति॥ अत्र कीचकशब्देन वेणुमात्रे फलवती भागत्यागलक्षणा॥ फलं तु

तन्न

चारुशब्दो त्यागिति ॥ अन्यथा वेणमेतस्यात् ॥ अत एव वामनः ॥ विशिष्टवाचकानांप
१० दानां विशेषणं विशेष्याप्यतस्समवधाने सति विशेष्यविशेषणान्यतरमात्रपरतास्था
स्येति ॥ एषः स्तो किल पुंगवः इत्यादिष्वपि द्वयमेव लक्षणं द्रष्टव्यं ॥ पृथिवी ध्वस्तः द्विजा इति
इत्यादिषु विशेषणमात्रे द्वयमेव लक्षणं तथा च वामनः सवृ[illegible] विशेषणे हि विधिनिषेधौ
सति विशेषणबाधे विशेष्यमुपसंक्रामतः सति विशेष्यबाधे विशेषणमुपसंक्रामतः ॥
वंशांकुरश्चारुरसीत्यादौ अत्र विशेषमात्रे लक्षणेयमेव ॥ अथागूढफला ॥ यद्यप्यगूढ
फला नावश्यं वक्तव्या तथापि प्राचीनानुसारेणोच्यते ॥ गरुड्यमिदं पीउजिष्यतिकिं ॥ डुच्य
तदेवाग्रे कथयिष्यति ॥ अत्र कथनशब्देन बोधनमात्रे अगूढफलं लक्षणया गरुशब्द
ब्दः स्तनद्वयवाचकः जहल्लक्षणया फलं तु सुखयिष्यतीति प्रतीतिः ॥ वसंततरुन्नर्तयति ॥ १०
अत्र वसंतशब्देन तद्वर्तिनि मारुते ॥ गूढफला जहल्लक्षणा फलं तु मंदगत्यालताचा
रुताया द्रुकत्वप्रतीतिः ॥ कालितारं नाजनानाकृयेति अत्र रंजाशब्देन तच्छिरोभागे

अगूढफला जहल्लक्षणा फलं तु फलस्याद्भुतत्वप्रतीतिः ॥ कटित्वजतिनं श्रीकाव्यप्रका
शो भागत्यागलक्षणा नास्ति अजहल्लक्षणायामंतर्भावात् ॥ अथ समानाधिकरणविषयासा
रोपासाध्यवसाना चकार्यकारणभावादेरुपजहल्लक्षणा यथा ॥ आयुर्घृतं ॥ आयुर्वेदं ॥
इत्यत्र आयुर्वा फलवती जहल्लक्षणा फलं त्वसाधारणकार्यकारित्वप्रतीतिः ॥ एवं तादर्थ्यात्ता
ताद्धर्म्यं कलिंग्याः सहिंसिकाः ॥ ताद्धर्म्यात्तच्छब्दो [illegible] ॥ यथा इन्द्रार्था स्थूणा इन्द्रः ॥ स्वस्वामिभाव
संबंधात्स्वीयस्य राजकीयपुरुषो राजा ॥ सादृश्यसंबंधे तु धेनुर्गौः ॥ अजहल्लक्षणा य कलिंगस्यजनाः
था मुखचंद्रः चंद्र एवायं गौर्वाहीकः गौरेवायं ॥ अग्निर्माणवकः ॥ अग्निरेवायं पंडि
तोयमपरः सूर्यः सूर्य एवायं ॥ सिंहो देवदत्तः सिंह एवायं इत्यादिष्वजहल्लक्षणापर्वा
र्यापरित्यागेनरूपाधिकार्य्यकरणात् ॥ अवयवावयविभावे च जहत्स्वार्थाजहल्लक्ष
णा ॥ यथाग्रहस्तः हस्ताग्रं ॥ अग्रपादः अग्रसेना इत्यादौ फलं तु मरुत्स्वा
दित्वप्रतीतिः ॥ निरूढा यथा रथेनी [illegible] ॥ अत्र रविबुद्ध्[illegible] निरूढा
धे ते ध ष्यां

जहल्लक्षणा ॥ मातृविशेषगणेश्वरः अत्र मातृशब्देन तृतीया गणेश्वरशब्देन चतुर्थी च लक्ष्यते ॥
११ इयं च परस्परगणार्थत्वात्फलवतीति केचित् यमो नगमनेशः स्तः इत्यत्र यमशब्देन च । रणिनश्च
त्र्यं लक्ष्यते ॥ तत्रापि पर्यवसितेयं ॥ हस्तिहस्तः कपिकुंजः अत्र हस्तकुंजशब्दौ आस्यसादृश्यात् शुंडा डा
यां गिरः पिंडयोश्च निरूढा जहल्लक्षणा ॥ बाणो रश्मेश्चलायनेः ॥ अत्र बाणशब्देन पंचसंख्या
गुण रूपगुणसादृश्यात् संचलायनानि लक्ष्यन्ते ॥ एवमश्वशब्देन च सप्त केचित्तु बाणाश्वरूपद्रव्या
भ्यां पंचसप्तसंख्ययोर्लक्षणा तलश्चलायने पुलक्षणेत्याहुः अन्ये तु बाणशब्देन स्मरबाणे
षु लक्षणा ततश्च संख्या, यां ततो लायनेषु इत्याहुः ॥ एवमश्वशब्देन सूर्याश्वेषु शेषं तुल्यं अ
थ निरूढा जहल्लक्षणा ॥ श्वेतो धावति ॥ अत्र गुणवाचिना श्वेतशब्देन तदाश्रये रूपादेनि २१
रूढा जहल्लक्षणा गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वति इत्यमरकोशात् ॥ केचित्तु श्वे
तो वर्णोस्यास्तीति श्वेतः अस्त्यर्थे मतुप् ॥ गुणवचनेभ्यो मतुपो लुगिष्ट इति तस्य लुकित्या
क्षिरे वैसाहुः मंचाः क्रोशंति ॥ इह मंचशब्देन तत्रस्था जना लक्ष्यंते ॥ अत्र फलाविवक्षायां

तु तात्पर्याविशेषावगतिरिति न्यायेन फलवत्त्वमपि भवति ॥ एवं कुंताः प्रविशंतीत्यस्य ॥
प्रविशंतीत्याद्यवधिशेषं ॥ द्रोणं व्रीहिः अत्र द्रोणरूपमानपात्रेण परिच्छिन्नव्रीहौ द्रोण
शब्दो जहल्लक्षणिकः वैयाकरणास्तु परिमाणविलक्षणार्थ इत्याहुः वस्तुतस्तु सामान्याकारेण परि
मंमाणे शब्दार्थो द्रोणरूपविशेषाकारेण लक्षणार्थ एवं सुरद्विषश्चांद्रमसीसुधेव ॥ अत्रा
सुरसामान्यवाचिना सुरद्विट्शब्देन राहुरूपविशेषो लक्ष्यते ॥ निर्विशेषं न सामान्यं वि
द्विरु शेषाणां तदुद्धिताः इति न्याया विशेषार्थलक्षणायां सामान्यार्थत्यागो नास्ति ॥ तद्गाम्नि निर्हश
बृपपद्धेत्तरवगः अवसरो विशेषवाचिना पच्चलशब्देन तत्सामान्यं लक्ष्यते ॥ तत्राप्यु
क्तन्यायेन न विशेषार्थत्यागः लक्षणा भिन्नस्य मुख्यत्वात् तिन्नूस्यात् ॥ अथ अजहज्जहल्लक्ष
णा अहं संमार्ष्मि ॥ अत्र अहंशब्देन तदेकदेशो निरूढा अजहज्जहल्लक्षणा ॥ एवं कुसुमितद्रुम
मित्याद्यवधि ॥ सोयं देवदत्तः अत्र पूर्वकालोत्तरकालवर्त्तित्वपरित्यागेन देवदत्तमात्रं ल
क्ष्यते ॥ एवं श्रुतिः शिवोहं सोहं तत्त्वमसीत्याद्यपि ॥ अथ लक्षणाप्रयोजकः संबंधो निरू

॥ याज्ञिकस्य यज्ञादिपात्रसंमार्जने ॥

प्यते ॥ स त्रिविधः संयोगः समवायो विशिष्टबुद्धियोग्यश्चेति । संबंधबुद्धिजनकः संबंध
१२ इति तल्लक्षणं ॥ तत्र द्रव्ययोरेव संबंधबुद्धिहेतुः संयोगो गुणविशेषः स च नानाविधः आ
त्मा चमत्करोतीत्यत्रात्मशब्देन तत्संयोगि शरीरं लक्ष्यते ॥ व्याप्यव्यापकभावसंयोगोयं ॥
वटे गावः सुशेरते ॥ अत्र वटशब्देन तत्संयोगि स्थलं लक्ष्यते ॥ तत्र स्वामीप्यसंबंधो वे चि
त्रुसाभिप्यंस्तमर्थं मित्राकुः घंटापथः अत्र घंटाशब्देन तदुपलक्षिता गजा लक्ष्यंते धार्य
धारकभावश्च संबंधः गणकी लेखकी अत्र गणकलेखक ... तस्य लक्ष्यते ॥ ख
पुं नर्तनार्यामिश्रसंबंधः योग्या द्वारवाया मितिकी पृथ्वीभुसयोर्विस्थानावस्थाने पि वि
वल्ली वाहकाने रस्तयोजन जन्मासंयोग्यायां ... विकर्त्तते ॥ नर्तनार्यात्तेने मौसंयुक्तावि ति
धीजलकत्वात् यज्ञार्हो सगुणाधिकाराश्च सैव्यसुची ... अत्रापलक्षणेन मे घपु १२
ष्प ... वासुदेवस्येति ... क्षा ह
चर्यं च संबंधः ... स्व सा च स्वसा च स्वसारोत यो ॥ अत्र द्वि

तीयस्वस्शब्देन तत्पतिर्लक्ष्यते ॥ यज्ञादिषु साहचर्यादिति ॥ एवं प्रथमयोः पूर्वसवर्णः ॥
अत्रापरेण प्रथमाशब्देन द्वितीया लक्ष्यते ॥ साहचर्यात् ॥ ... गरुडेन निषा
भ दयामोस्ति ॥ अत्र ग्रामशब्देन ग्रामवासिनो जना लक्ष्यंते ॥ आधाराधेयभावश्च संबंधः
सेतुबंधेन रस्मात् अत्र सेतुबंधशब्देन तदाधारः समुद्रो लक्ष्यते । आधेयाधारभावः र
स्वामीप्यवासंबंधः एवमन्यत्रापि ... नित्यसंबंधः समवायः स पंचविधः अवयवावय
वीभावः गुणगुणिभावः क्रियाक्रियावद्भावः जातिव्यक्तिभावः विशेषनित्यद्रव्यभाव
श्चेति ॥ ... यथा शाखामृगो वनमृगः इह शाखाशब्देन तरुर्लक्ष्यते ॥ अ
वयवावयविभावसंबंधात् वनशब्देनापि तथैव ॥ नहि वानरस्य केवलं यां शाखायां
... वने वा नियतः संचारः ... तु नियत इति ... सोमान्वयमन्वयुस्तं ॥ नृतं
न्य मनोरन्वयमन्वमन्त ... अन्वयशब्देन तद्देकावयवो लक्ष्यते ॥ एवं र
घुणमन्वयं ... निरुध्यमानायदुनिःकथंचित् ॥ रघुयदुशब्दाभ्यां तदवयवा लक्ष्यं

१३

१३

त्य इत्याभावश्चेति ॥ क्रमेणोदाहरणानि। यथा शाखामृगो वनमृगः इह शाखाशब्देन तरुर्ल
क्ष्यते। अत्र अवयवावयविभावसंबंधात् वनशब्देनापि तथैव ॥ नहि वानरस्य केवलायां शाखायां स
कलेवने वानियतः संचारः वृक्षेषु नियत इति सैन्यानि सोमान्वयमन्वयुरुत्तं नतं मनोरन्वयम
न्वमन्यत इत्यन्वयवाचिना अन्वयशब्देन तदेकावयवो लक्ष्यते एवं रघूणामन्वयं वक्ष्ये ॥ निरुध्यमा
ना यदुभिः कथंचित्। रघुयदुशब्दाभ्यां तदवयवा लक्ष्यंते। संतानो हि शरीरावयव इति धर्मशा
ओर्वः स्त्रे और्वः पथ्वीत्यत्र और्वशब्देन पुत्रत्वेन स्वीकृतो वयवाग्निर्लक्ष्यते। पथ्वी यथुना पुत्रीत्वेन स्वी
कृता भूमिर्लक्ष्यते। पृथुयोगादाख्यातायामिति ऊपृ देवका सूर्यया सा ऽर्ज अपत्राण्युक्तस्तत्र पाडीपृ
देवकपुत्रित्वात्कर्णेति तदभिधानं। ननु सूर्यशब्देन वोढृवाचकः एवं कुंतीशब्देऽपि कुंतीभोज
पुत्रित्वात् इत्यादिस्त्वयमत्वं स्युपमगुणिभावो यथा सुरभिषु फलेषु मानसं अत्र सुगंधगुण
वाचिना सुरभिशब्देन तदाश्रीभूत फलानि लक्ष्यंते गुणगुणिभावो ऽत्र संबंधः। शिशिरोपि पयसी
त्यत्र तु न लक्षणा शिशिरशब्दः स्पर्शीत गुणे तद्वद्द्रव्ये सुषीमः शिशिरो जड इति श्लोके ऽमरसिंहेन
द्रव्यवाचित्वाभिधानात्। शर्करामास्वादयति अत्र शर्कराशब्देन तत्कृतमाधुर्यगुणो लक्ष्य

त्रिवे
१८

तेगुणगुणिभावश्च संबंधः क्रियाक्रियावद्भावो यथा पश्य मृगो धावतीति क्रियापदेन क्रियाविशि
ष्टो मृगो लक्ष्यते क्रियानामेयमत्यंतादृष्टेति भाष्यकारोक्तस्तद्दर्शनासंभवात् क्रियाक्रियावद्भावश्च
संबंधः एवं नत्यं पश्यति वेश्याया इत्यादावपि भेर्यः श्रूयंते अत्र भेरीशब्देन तद्ध्वनिर्लक्ष्यते
संबंधस्तु स एव भेर्याकारस्य गुणित्वं शब्दस्य च गुणत्वं गुणगुणिभावः संबंध इति केचित् पुष्पं जिघ्र
ति तद्गंधं गृह्णातीत्यर्थः पुष्पस्य पृथ्वीमयत्वात् गंधेन सह गुणगुणिभाव तद्गंधं जिघ्रतीत्यत्र न
लक्षणा क्रियापदे तु भागत्यागलक्षणा उपादानमात्रार्थत्वात् जातिव्यक्तिभावो यथा क्षत्रजातिरु
दियाय भुजाभ्यां अत्र क्षत्रजातिशब्देन तदाश्रयीभूता व्यक्तयो लक्ष्यंते जातिव्यक्तिभावश्च सं
धः न जातु गां घ्नंतं हन्यात् अत्र व्यक्तिपरेण शब्देन तत्संबंधवती जातिर्लक्ष्यते अन्यथा सर्वेषामवध्यत्व
नस्यात् संबंधस्तु स एव सामान्यविशेषभावोप्ययमेव केचित्तु बहुव्यापकं सामान्यं अल्पव्या
पकं विशेष इति लक्षयित्वा ऽत्र दंतिदितित्तमपि सामान्यविशेषभावमाहुः यथा जनेन यूनः स्क
ब लात तदा स्पृदे अत्र यून इत्यनेन यौवनविशिष्टा राजानो लक्ष्यंते निदर्शनं नैषधमभ्येचय
ते। इति न लेप्रतिनिर्देशात् अदेवमातृकाः कुरवः अत्रादेवमातृकाशब्देन नदीमातृका

लभ्यंते अन्यथा देवरूपमातृरहिता इत्यर्थः स्यात्। सामान्यविशेषभावश्च संबंधः यतो देवमातृकभि
न्नाः कूपादिमातृका विदेशा भवंतीति एवमसितयामिनीषु अनीलवाजिनमित्यादावपि द्रष्टव्यं। वि
शेषनित्यद्रव्यभावो यथा स एव कालेन दुरत्ययेन नते अत्र कालेनेति भावप्रधाननिर्देशः तेनानि
त्यद्रव्यस्य कालत्वेन विशेषणोक्तः संबंधः रतितात्पर्यिकाः यद्वशादयमनेन विशिष्ट इति बुद्धिरुत्पद्य
शि ते स विशिष्टबुद्धिजनकः स नानाविधः तत्र जन्यजनकभावो यथा विधिहेतुरहेतुरागसां अत्रागःशब्देन
तज्जन्यं दुर्यशो लक्ष्यते तेन दुर्यशसां महेरर्घ्यः सिद्ध इति एवं मुनिभिः स्मृतः अत्र स्मृतशब्देन तज्ज
न्यं कथनं लक्षणा मुनयो विदुः अत्र विदुरित्यनेन तत्कृता ग्रंथा लक्ष्यंते ऊर्मिलैकाक्षरं ब्रह्म अत्र ब्र
ह्मशब्देन ब्रह्मवाचकमित्यर्थो लक्ष्यते विशेषणविशेष्यभावश्चात्र संबंधः काकः काकः पिकः पिकः अ
त्र हस्तशब्देन प्रशस्ताहस्ता लक्ष्यंते एवं रामस्य गात्रमसीत्यादौ व्यर्थपदं किंचिदर्थं गमयति। तत्र वि
शेषणविशेष्यभावः संबंधः हरिवंशः श्रूयते रघुवंशः पठ्यते इत्यादौ हरिवंशरघुवंशशब्दाभ्यां तत्प्र
ति पादकग्रंथयोर्लक्षणा वर्ण्यवर्णकभावश्च संबंधः कुमारकिरातनैषधाः पठनीयाः अत्रापि वर्ण्य
नामभिस्तद्वर्णकाग्रंथा लक्ष्यंते नामैकदेशेन समस्तनामग्रहणं चेदवयवावयविभावोक्तः। अ

पमे

त्रि. नुकूलं भाषते अत्र कूलमनुगतमनुकूलमिति व्युत्पत्त्या तीरलग्नं नदीजलं वाच्यं तत्सादृश्याद्वचने लक्षणा
उपमानोपमेयभावः संबंधः विलोमं वाऽस्मि अत्र विपरीतं लोम विलोममिति व्युत्पत्त्या वक्रीकृतं लोम वाच्यं
१५ तत्सादृश्याद्वचने लक्षणा समीपगतं संगता आपो यस्मिन्निति समीपं द्व्यंतरुपसर्गेभ्य इत्यकारस्येका
रः सुखभजलस्थानं वाच्यं तत्सादृश्यात् ग्रामवर्त्तिनि प्रदेशे लक्षणा एवं संबंधांतराणि स्वयं विभावनी
यानि प्रायो न्यायशास्त्रानुसारादिषु विवेचना अवयवावयविभावस्य कार्यकारणभावस्य सामा
वि न्यविशेषभावस्य च द्वैध्येपि न दोषः अथ त्रिविधे साक्षात्संबंधे सत्येव लक्षणेति न नियमः प्रत्यक्षे
संयुक्तसमवायादिवत् परंपरासंबंधस्यापि लक्षितलक्षणाद्यावुपयोगदर्शनात् तथा लक्षिते न ल
क्षणया गृहीतेन भ्रमरादिशब्देन द्विरेफादेः षट्पदपिंडादौ लक्षणा लक्षितलक्षणेत्युच्यते तत्र द्विरेफ
शब्दो द्वौ रेफौ यस्मिन्निति व्युत्पत्त्या योगिको न तु योगरूढः भ्रमरशब्दपरतया प्रयोगदर्शनात् तेन
निर्झरर्षभ्रशिरनिर्झरादि सकलरेफद्वयान्वितशब्दसाधारणवाची न तु केवलभ्रमरपरः तत्र द्विरेफश
ब्दः सामान्यविशेषभावसंबंधेन भ्रमरशब्दे लाक्षणिकः यथा मुनिमभिमुखतोनि नीपवोयरत्यत्र
मुनिशब्दो नृपतिमुनौ लाक्षणिकः नृपतिमुनिपरिग्रहेण साधुरिति प्रयोगदर्शनात् अथवा वाच्य

३

वाचकभावसंबंधेन लक्षणयाऽभेदारोपात् भ्रमरशब्दलक्षितपदे द्विरेफशब्दस्योक्तरीत्या लक्षणा लक्षि
तलक्षणा तत्र संबंधद्वयसंभवात् परंपरासंबंधः एवं यत्र नाम्नैकदेशेन नाममात्रग्रहणं तत्रावयवाव
यविभावसंबंधेन समग्रशब्दे लक्षणा ततस्तदर्थे वाच्यवाचकभावेनेति बोध्यं यथा आभाकासितपक्षे
ष्विति इत्याभाकेति शब्दावयवैव राजाशब्द भाद्रपद कार्त्तिकाद्यवयविनो लक्ष्यंते ततस्तदर्थभूता मासाः
ति एवं भीमो भीमसेन इत्यादावपि द्रष्टव्यं व्याकरणे भलतु विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वक्तव्य
इति भीमादिषु शक्तिरेव व्यतिरेकलक्षणायामपि परंपरासंबंध एव नयेन जेतुं जगती सुयोधन इ
त्यत्र सुयोधनशब्देन दुर्योधनशब्दे लक्षणा ततस्तद्वाच्ये राज्ञीति विवेकात् एवं साधुद्रुति पुनः साधु
इत्यादावपि बोध्यं अथ गौण्या विशेषः गौण्यां लक्षणायामपि परंपरासंबंधः उपमानोपमेयध
र्मिणामभेदारोपात् तत्र द्वितीया लक्षणा प्रवर्त्तते तत्र राजेन्द्रः राजेंदुः नसविता न सोमः भूपालसिं
ह मित्यादावुपमितसमासे व्यस्तोपमायां समस्तरूपके च लक्षणा नास्ति समासे खलु भिन्नैव शक्तिः
पंकजशब्दवत् इतीवशब्दार्थस्यैवकारार्थस्य च समासशक्त्या निर्वाहादिति प्राचः यद्यपि सिद्धांत
कौमुद्यां इत्यूर्वपदं तत्सदृशे लाक्षणिकमित्युक्तं तथापि लाक्षणिकसदृशमिति तदर्थश्रियणे नस

क

मासशक्तिर्वै दिवसैः इत्यत्रानुसंधेया अन्यथास्य सिद्धांतभंगापत्तेः उद्धतुरिव वामन इत्यादि दिधिशब्दस्य
त्रि॰ सादृश्यवाचित्वादारोपाभावाच्च लक्षणाभावः मुखचंद्र इत्यादौ समस्तरूपकेऽप्यारोपसत्त्वेऽपि तस्य समासो
त्पन्नसमुदायरूपत्वान्निर्वाहाल्लक्षणाभावः अत एवास्योदाहरणानि दर्शितानि प्राचीनैः कैश्चिद्धि नंदेपि स्त्री
२८ रत्नं गिरिजेत्यत्र व्यस्तमेवोदाहरणमित्यवधेयम् एवं च व्यस्तं तु रूपकं अत्रोपमानोपमेययोः संबंधः साद
श्यं तु तदेव तल्लक्षणं तूक्तं विद्यानाथेन अन्योन्यधर्मशालित्वं स्यात्सादृश्यमुच्यते तन्मूलमुपमादीनां
हारादीनां हिरण्यवत् १ इति अत्र स्पष्टपदेन देवदत्तयज्ञदत्तयोः प्रसक्तत्वाभावे मनुष्यत्वब्राह्मणत्वादिधर्मे
र्मेण सादृश्यस्य प्रत्यस्य संप्रदायसिद्धत्वात् अन्योन्यपदेन तद्धर्मो भिन्नत्वमुक्तं ततश्च भिन्नयोर्धर्मि
श्य णोरभिन्नधर्मशालित्वं सादृश्यमित्युक्तं भवति ननु अन्यधर्मस्यान्यत्रासंभवादन्योन्यधर्माभेदः कथमि
ति चेदुच्यते तावेन भ्राजते सूरः शूरश्चापेन राजते इत्यादौ सूरशोभा शूरशोभयोर्भेदेपि सजातीय
त्वेन भेदाभावः रूपकादौ त्वभेदारोपात् भेदाभावः अयं च वस्तुप्रतिवस्तुभावः कथ्यते त्वमेव
कीर्तिमान् राजन् विधुरेवाहि कांतिमान् इत्यादौ च कीर्तिमत्वकांतिमत्त्वयोर्वैजात्येपि बिंबप्रतिबिंब
भावेनाभेदप्रतीतियोग्यत्वं अत एव लक्षणेऽभिन्नशब्देनाभेदप्रतीतियोग्यत्वं विवक्षितमिति बोध्यं

३

रणा
सारोपायां गुणमात्रलक्षणा गौणी तु शक्त्या गम्यते साध्यवसानायां तु द्वयोरपि तत्र विषयस्य निगीर्ण
त्वेच्छया तस्मिंस्तद्बुद्धिरारोपः स्वेच्छया विषयिणा विषयग्रहणमध्यवसानम् श्रीधरस्वामिना गौणीवृत्ति
र्भिन्नैवेत्युक्तं यदि लक्षणावृत्तिर्न स्यात्तर्हि घृणाकरं चपाकुरममंगलं चेति त्रिविधमश्लीलं वारयितुं कः
क्षमेत तथाहि विष्ठोत्सारणकर्त्तामर्त्तीकार्येषु पादचार्यनुगः कृतजंभनाश्च विटस्त्रीकार्येगतोपि तुच्छमन
ल्पानि अत्र लक्षणया दोषोद्धारः मलसंमार्ज्जनकर्त्तात्यक्तास्मे श्वपादचार्यनुगः कृतगमनोऽच विरस्त्री
कार्यगतोपि तुच्छमल्पानि अत एवाहुः शक्तिं भजंति सरला लक्षणां चतुराननाः व्यंजनां नर्ममर्मज्ञाः
कवयः कमनाजना इति श्री इति श्रीपदवाक्यप्रमाणपारावारीणरामजीभट्टात्मजाशाधरभट्टवि
रचितायां त्रिवेणिकायां वृत्तिविवेचनायां द्वितीयं लक्षणाप्रकरणं समाप्तं श्री श्रीगणेशाय नमः
शक्तिलक्षणातिरिक्तार्थबोधिका वृत्तिर्व्यंजना सा च मुख्यार्थबाधाभावेपि प्रवर्त्तते शक्तिलक्षार्थबोध
नानंतरं च तेन शक्तिमूला लक्षणामूला चेत्याहुः दूरार्थबोधे व्यंजनामूलापि व्यंजना भवति क्रमे
णोदाहरणानि तत्र प्रकृताप्रकृतश्लेषे शक्तिमूला व्यंजनेत्यर्थः सा यथा आशाधरकृदुत्सन्ना
विमलाबुद्धिभूषिता कोविदानंदसंजनुग्रास्तेषात्त्रिवेणिका अत्र ग्रंथपरत्वेन तीर्थपरत्वेन कन्या

त्रि० परत्वेन च योजनया पक्षत्रयं तत्राद्यं पत्नीर्थयोरभेदोपचारात्प्रकृतश्लेषः तत्रसादृश्यमात्रं व्यंजना
गम्यं कन्यापक्षस्तु व्यंजनागम्यः तत्र येषां शब्दानां विनिमयः कर्तुं न शक्यते तदाश्रयात्व्यंजना शब्दावयवाश्र
यापि सादृश्यपते यथा दानीपानीतथाज्ञानीध्यानीमानीनिधान्यपि राजाभयरचित्रोयं येन राजन्वती क्षितिः
१५ १ दानाब्धुप्रदः पानीमधुपः ज्ञानीसुज्ञः ध्यानीनित्यध्याननिष्ठः मानी अवलीप्तशयित मानवान् निधानी
निधिसंपन्नः अत्र नमन्नित्यादौ प्रशंसासु नित्ययोगेतिशायने संबंधेस्ति विवक्षायां भवतीमतुबादयः
इतिवार्तिकोक्तानामादयो द्वयोर्थो व्यंजनागम्याः तद्धितद्योत्यत्वात् द्योत्यार्थस्य काव्यप्रकाशे व्यंग्यत्वस्वी
कारेणात द्वतोध्वनित्वमुदाहृतं द्योत्यार्थे हि संकेताभावान्न शक्तिः शक्यार्थबोधानंतरं तद्बोधाच्च शब्दबु
द्धिकर्मणां विरम्यव्यापाराभावात् नापि लक्षणा प्रत्ययमुख्यार्थबाधाभावात्संबंधाभावाच्च राजन्वतीत्यत्रा
पि राजपदं शोभनराजलाक्षणिकमिति तन्न अमितवंबत्तो लक्षणा नास्तीति सिद्धांतात् तत्र नकारेण चा ७
रणे शोभनत्वं व्यज्यते इति प्रकृताश्रया व्यंजनेवेतिदिक् अथाश्रयाउभयाश्रया च व्यंजनाको विदानेदृ
ष्टा लक्षणामूला यथा कलत्रवान्नंबालेकनीयांसं भजस्वमे अत्र कलत्रशब्दे तत्सांनिध्येलक्षणा
अनन्यथा लक्ष्मणस्यापितथात्वापत्तेः बालेइत्यनेनच भरिकामत्वेलक्षणा बालास्यात्षोडशाब्दात

३ उपरितरुणी त्रिंशतो यावन्मध्यमिति निरति रहस्योक्तेः तत्त्वादं [आ] भोगवत्सत्वान्नत्वदभिगम्यः मंत्रोहिकामा
तुरायास्तव संभोगो न स्यादिति व्यज्यते किंच स्वस्य कलत्रसान्निध्योक्त्या एकपत्नीव्रतत्वं गम्यते तेन [त] तंत्रि
धोर्जुलन चर पानिषेधात्सीतायाः स्वाधीनपतिकात्वं चेति व्यज्यते तत्र च कलत्रवानहं कबालात्वं केति ८
विषमालंकारोपि गम्यः कनीयांसमिति लक्ष्मणविशेषणाद्संनिहितकलत्रकनिष्ठश्चासबालायास्तवानु
रूप इति समालंकारो गम्यः स्वस्य लक्ष्मणस्य च विषमालंकारः यद्वा कलत्रशब्देन लावण्यादिगुणसंपन्न
कलत्रे लक्षणा तेनाता दृश्यात्वया मम किं प्रयोजनमिति व्यज्यते व्यंजनामूलाव्यंजना यथा क्षीरं त्यजं
नीरं पिबंचहंसं व्यासं विरक्तंच रउकं ग्रहस्य वदामि वाणीम मत्वे यथार्थात्तदा सुधीभिर्मम धीर्नेनिधा
अत्र सुधीशब्देन परीक्षाकुशलत्वं व्यज्यते सुधीयो हि परीक्षामंतरेण कृतिं वा निंदां न कुर्वंति प
रीक्षा हि दुग्धानां क्षीरे वा सहपरिचर्याभावात् रूपपाटवं न स्यादेवेति युक्तिः तत्सदृशानां ज्ञानीनाम
त पि स्थूलमेयानि घपरिणाम तया आपातरमणीयतयाच विषयसुखं हेयं भवति सूक्ष्मतयानि
र्विकारतया सर्वकालरमणीयत्वेन च ब्रह्मसुखमुपादेयं भवतीति युक्तं लोकप्रसिद्धं न तथेति
किंच व्यासस्य पत्यश्रवणादरणपतितास्तु काल्लुकीनाभाप्नरोपदर्शनाद्धु भितास्तु त्रा सतिर्व

र्णनात्वं नर्हे विधाप्रवर्त्तकत्वात् विरक्तत्वमवसीयते प्रसिद्धभारतकथामनोस्यपलीद्वारापुत्रोत्पत्त्यादिक
त्रि. थनं विरुद्धमेव शुकस्य चापत्यपंक्तिचकवर्णनात्स्वरूपेण रूपांतरेण वाग्रहस्यात्वमिति बोध्यं तत्र ह
१८ रिवंशे स्वरूपेण भगवते च सह त्वां शुककन्यायामिति शुक्रोक्तौ ममकन्यायामिति वक्तव्ये निःशुकप
दं रूपांतरबोधनार्थमिति एवं परीक्षितेयुक्तिमूला शास्त्रमूला च ममवाणी सत्या भवति चेत्तदर्थ
विषयाममधीः स्फुरत्येव भवतीति सुधीशब्दगम्योर्थः तत्रश्च अस्मिन्ग्रंथेको विद्वानं चेदेव प्रसिद्धवि
रुद्धं किंचिदस्ति चेत्परीक्ष्यस्स्वत्यमेवेति प्रार्थना व्यज्यते अत्र तार्किकाः व्यंग्योर्थो ज्ञापकेन हेतुनानु
मीयते तदर्थं न व्यंजनास्वीकार्या अनन्यलभ्यो हि शब्दार्थ इति न्यायादिति द्विकवृत्तिस्वीकारे गौरवा
च्चेत्याहुस्तन्न साधु इति पुनः साधुकर्त्तव्यं किमतः परं यन्मदर्थं विलक्षितानिदं तैरपि निरवैरपि १८
अत्र काकुवक्रोक्तौ व्यक्तिरेव लक्षणा न तु व्यंजनया मद्रमणेन सह विलसंत्या न्ययानुचितस्त्वार्थसा
रेखेश्च धनं कृतमिति व्यज्यते तत्र दैतेर्नेत्रविलक्षणत्वं हेतुः तस्य च नियुक्तसाधारणत्वेन सव्यभिचारत्वा
न्नानुमानसिद्धिरिति व्यंजना स्वीकार्या एवमन्यत्रापि द्रष्टव्यं अत्र वैयाकरणाः शक्तिरेव शब्दप्रव
त्तिः तस्याश्च प्रसिद्धाप्रसिद्धिभ्यां शक्तिलक्षणाव्यपदेशः व्यंजना तु तत्रांतर्भवति दीर्घव्यापारस्वी

रा

कारादिति तन्न सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायात् वाच्यार्थबोधानंतरं व्यंग्यार्थे श
क्तेरप्रवृत्तेः इंद्रियाणां स्वविषये घ्राणादिर्योग्यता यथा अनादिरर्थैः शब्दानां संबंधे योग्यतात्वे
तिशक्तिलक्षणस्य व्यंजनायाम प्रवृत्तेश्च व्यंजनाया अनादित्वाभावात् काव्यस्योत्तमादिभेदत्रया
नुपपत्तेश्च उत्तमकाव्यं हि व्यंग्यार्थप्रधानं तदभिन्नं च मध्यमं गौणमिति त्रिकादिशब्दचित्रं वायुमि
त्रस्तुतवेधुवाहनेत्याद्यर्थचित्रं चाधमं अनुप्रासोपमाद्यर्थचित्रं चा[illegible] [illegible]मत्कारकारित्वा
त्क्वचिदुत्तमं क्वचिन्मध्यमं चाधमं तु न काव्यतया गणनीयं यथाह ध्वनिकारः प्रधानगुणभा
वाभ्यां व्यंग्यस्यैव व्यवस्थिते उभे काव्ये ततोन्यद्यत्तच्चित्रमभिधीयते इति तस्मात्सिद्धा व्यंज
नायास्सफलत्वमिति दिक् यदि हि लिखलाम व्युत्पत्त्यापत्तेर्लघुदूषणं निपुणधिषणो रुचि
त्वात् द्युतिर्मर्मे सेव्यतां सरसि विमले बालक्षितं नि वार्य शैवलं सलिलममतत्राय त्रायः पि
बेति पिपासव ।।१।। यदि मम वीरस्य त्वां कश्चित्कथंचन दूषणं प्रलपति तत्स्नेहप्रस्रेः स
र्किंकविभिस्समः रघुपतिकुटुंबिन्यां सत्यामवधत्सुदा हरन्नू हलकरजकः साम्यं लेभे सार्किंसह
राजभिः २ प्रभापटलेनिबद्धमिदं हरिणीह यंतापापनोदाय त्रिवेणिकाक्रांतेविस्तन्य सत्ते य

त्रिवे॰
रणी

धार घुवंशस्था: श्लोकस्त्वकृतत्वात् कुमारसंभवे विन्यस्ता:॥ ॥इति श्री पदवाक्यप्रमाणपा
रावारीण रामजीभट्टात्मज शशधरभट्टविरचितायां त्रिवेणिकायां व्यंजनाप्रकरणं तृतीयं॥ ॥
१८ ॥ श्री ॥ शुभं भवतु॥ ॥ श्री ॥ श्रीकृष्णायनम:॥ श्री ॥

ओडेयोपाध्ये घनश्यामस्येदं

१८

३